M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 930

Title: Ati Desha
(Mimansa)

930

Z

Alidesha. (मीमांसा) ([illegible]).	Title.
	Author.
	Editor.
S/C	Year, Vols.
	Publisher.
[illegible]	Remark.

मीमांसा.

930

श्रीगणेशायनमः नातिदेश्यत इति वा अतिदेशं इति वायुससा वचनादिप्रमेयं तज्जन्यबोधो वा। अ।ति द
शपदार्थः सप्तमादौ निरूप्यः प्राकृतात्कर्मणोयस्मात्तत्समानेषुकर्मसु धर्मप्रदेशोयेनस्यात्सोतिदेशइति
स्मृत इसाधाकरग्रंथविरोधापत्तेः सति संभवे ×ग॑× आकरविरोधस्य परिहार्यत्वात् सर्वानुगतस्य
प्रमेयस्य तद्बोधस्य वा अनतिप्रसक्तस्य अस्मन्निरुक्तिव्यतिरेकेण निरूपयितुमशक्यत्वाच्च अतोवचनादि
सर्वातिदेशप्रमाणसाधारणा इयं निरुक्तिः भाट्टदीपिकायां अकादि यः पदार्थो यादृशोपकारद्वारेण यदंगत्वेन अवधारित
स्तस्यपदार्थस्य तत्संबंधित्वेन रूपेण तादृशोपकारद्वारा अन्यांगताबोधकं वाक्यं अतिदेश इति अत्रलक्ष्यसमन्वयो यथाकृत
पदकृत्सानि तत्रैवद्रष्टव्यानि यस्तु तत्रात्रभवतां विद्वद्वर्यमूर्धन्यानां आक्षेपस्तत्र कोहं खंडमतिः समाधातुं तथापिमिवदत्ताल
परिपाकोद्गारः कश्चिदिहोल्लिख्यते तथाहि स्वर्गाद्यंगत्वेन अवधारितानां दर्शादीनां तेनैवद्वारेण पापक्षयार्थताबोधके यावज्जीवादिवाक्ये
अतिप्रसंगवारणार्थं तत्संबंधित्वेन इति विशेषणं तत्रायमाक्षेपः न स्वर्गपापक्षयार्थत्वेन नैकः पदार्थो विधीयते येनविशेषणादानाभावे अति
व्याप्तिः प्रसज्जेत भिन्ना एव तु काम्यनैमित्तिकदर्शादिप्रयोगास्तत्तत्फलार्थं विधीयते पूर्वपक्षे काम्यस्यैव प्रयोगस्याभ्यासः सिद्धांते प्रयो
गांतरं नित्यवद्विधीयते इति भेदप्रसंगात् प्रयोगभेदाभेदविचारद्वाधाकरग्रंथात् अतस्तत्र अतिव्याप्त्यप्रसंगाद्व्यर्थं विशेषणमिति तन्न भेदकप्र
माणाभावे आकरविरोधस्य अप्रयोजकत्वात् तथाहि न तावद्दैशिकः प्रयोगभेदः वाजिनादावपि तदापत्तेः अपितु प्रयोगभेदकप्रमाणात
त्स एव वा इत्यादिषु तथाहि देशकालकर्त्रादयः प्रयोगान्वयिनस्ताद्दृन्न द्रव्यदेवतादेस्तु उत्पत्त्यन्वयिन इति तावत्तत्र तत्राकरे उन्नीयते अ
त एव द्रव्यादीनां प्रधानमात्र एवान्वयः देशादीनां तु सांगे इति व्यवस्थापयिष्यते तदिह वाजिनादेर्द्रव्यस्योत्पत्त्यन्वयित्वाद्द्रव्यदेवताविशिष्टयागो
त्पत्तिविधिप्रतीतेर्युक्तः कर्मभेदः उत्पत्तिर्हि धर्मिस्वरूपज्ञापका न चज्ञाते तत्स्वरूपे पुनर्ज्ञापनं संभवतीति सिध्यति तत्र धर्मिरूपकर्मस्वरूपभेदः
यत्र तु वा इत्यादौ दक्षिणा ब्राह्मणादिरूपः प्रयोगान्वयी गुणः श्रुतः तत्र प्रयोगस्यैव तद्गुणविशिष्टस्य विधेयत्वावगतेः पूर्वविहितेभ्यः कर्मभ्यो
तद्दक्षिणारूपगुणविशिष्टेभ्यः प्रयोगेभ्यो भेदावगतिः तत्रोत्पत्त्यन्वयिगुणाभावेन कर्मभेदस्याप्रसक्तेः तदिह पौर्णमास्यां पौर्णमा

अतिदे॰ २. स्यायजेतेत्यादि कालदेशादिविधौ कालदेशादिविशिष्टप्रयोगविधाना प्रयोगस्य प्राप्ततया स्वर्गवाक्य एव तावत् काम्यप्रयोगविधौत्र
प्राप्ताभावः नहि फलस्य प्रयोगान्वयित्वं येन विनिगमनाविरहात् स्वर्गवाक्येपि प्रयोगविधिः शक्येत अपितु विनियोगान्वयित्वमेव अ
न्यथा यज्ञेन दानेनेत्यादि विविदिषावाक्येपि प्रयोगविधापत्तौ सर्वयज्ञानां सर्वकर्मणामेकवा एकप्रयोगतापत्तिः अतएव यज्ञेनेत्यादि
२ वाक्यं शतपथविहितं कर्मेदं गृहीत्वा चोदस्याम्नानासिद्धं पुरुषविविदिषामात्रे साध्ये पुनरुक्तौ साचार्यवचनं संगच्छते आ
म्नानं प्रयोगः युक्तं चेष्टसाधनत्वबोधकविनियोगविधौ इष्टस्य फलस्यान्वयइति पर्वणि जुहुयादित्यादौ तु पर्वशब्दानु
रोधेन प्राप्तप्रयोगानुवादेन पर्वकालमात्रविधानं नतु प्रयोगांतरविधानं येन तत्रापि प्रयोगैक्यं शंक्येत सुक्तं कौस्तुभे अतश्च स्व
र्गवाक्यएव प्रयोगस्यासिद्धौ किं प्रतियोगिके यावज्जीववाक्यप्रयोगांतरमिति अथकालादिवाक्य विहितप्रयोगपक्षेपि एव
अत्र प्रयोगांतरमितिचेत् निमित्तस्य तदाक्षिप्तपापक्षयरूपस्य वा गुणस्य पूर्वप्रयोगनिविशमानत्वाभावेन तस्य भेदकत्वानु
पपत्तेः नच विनिगमनाविरहात्त्रापि विरुद्धः प्रयोगांतरविधिः तथापि वै कालादिविशिष्टप्रयोगापत्तौ नित्यत्वस्यापि संत्वेन का
म्यप्रयोगात्प्रयोगांतरमित्याकरग्रंथस्वरसानुपपत्तेः वस्तुतस्तु निमित्तस्य न प्रयोगांतराक्षेपकत्वं तत्तत्प्रयोगविधिबोधितदर्श
द्यनुष्ठानस्यैव स्वस्व आवश्यकत्वमात्रबोधकत्वेन प्रयोगांतराक्षेपे प्रमाणाभावात् अतएव आवश्यकत्वबोधस्यापि प्रत्यवायजनकीभू
ताकरणप्रतियोगित्वमात्रबोधः प्रत्यवायक्षयजनकत्वबोधश्च फलमिति फलतो निमित्तस्वर्गार्थविनियोगाद्धित्रियोगांतरस्यैव आक्षे
पे अतश्च स्वर्गवाक्ये यावज्जीववाक्ये च प्रयोगभेदाभावात् विधेयस्य दर्शादेरेकत्वात् तिव्याप्तिप्रसक्तौ युक्तं तत्संबंधित्वेनातिवि
कं श्रावणं विस्तरेणाचद्व्दंउपपादितं इंद्रियकामाधिकरणामारभ्याद्वितीयषष्ठे कौस्तुभभाट्टदीपिकयोः अस्तुवानिमित्तस्य प्रयो
गांतराक्षेपकत्वं तथापि स्वर्गसंबंधित्वेन विहितदर्शादेः सार्वकाम्यवाक्ये विविदिषावाक्येवा अन्यांगत्वविधानात् अति
व्याप्तिप्रसक्तौ सार्थकमेव विशेषणं नचतत्संबंधित्वेन विशेषणे संबंधित्वस्य जनकतांगत्वरूपत्वा भाष्टंबदजनकत्वेना
कांशस्यैव प्रयाजादीनो अन्यथासिद्धापत्ते र्दिसुपकारजनकता नापत्तिः विकृसुपकारं प्रति समिदादित्वेनैव जनकत्वेपि प्र
कृतिसंबंधित्वस्य अतिदेशविधिविधेयताव ×छे× च्छेदकत्वे बाधकाभावात् यदपि कवतीपुरथंतरं गायतीत्यादौ अभि

वतीसंबंधित्वस्य कवतीष्वतिदेशे अश्रवणादव्याप्तिरित्याक्षेपांतरं तत्तदधिकरणएव द्वेधा समाहितं रथंतररूपेण अभिवतीसंबं
धिरथंतरत्वेलक्षणा अन्यथा धर्मग्राहकत्वे तापकारत्वाभावेन धर्मकरणानुपपत्तेः वस्तुतस्तु गृहमेधीयाज्यभागवदस्या
नतिदेश्यत्वमेव आवश्यकस्तोभादिरूपधर्मलाभस्तु तद्वदेव प्रधानं नीयमानं हीत्यनेन न्यायेनोपपन्न इति अदृष्टार्थधर्मला
भार्थमपिन लक्षणेति यत्तु तत्र आद्यपक्षाक्षेपो धर्मलाभस्य न लक्षणा तात्पर्यग्राहकत्वमिति सोऽस्माभिरेव विश्वजिदधिक
रेस्पष्टीकृतइति द्वितीयपक्षस्य अपोद्धलकएव ×सं×